HammīMaKā. 2.76; यानन्वहं पुनरवर्धयदेणशावानार्या विदेहतनया तृणपूलदानात्। ते दक्षिणां दिशमुदश्रु निरीक्षमाणास्तस्याः प्रवृत्तिमिव नौ विनिवेदयन्ति JānaPa. 6.21; HariVaṁ.1.395*(2); **2** always विरागमुपयाति ...। क्रियासूदाररूपासु क्रमते मोदतेऽन्वहम् AkṣU.5; अयं च गाधेस्तनयो महातपा यदन्वहं वर्धयति स्वतेजसा। तदेतदिक्ष्वाकुकुलं प्रसाधितं भवद्यशोभिः Rāgh. 4.56; तीर्थानि च निषेवेत स्थानानि मम चान्वहम् ParaS. 30.80; शंभो त्वं परमान्तरङ्ग इति मे चित्ते स्मराम्यन्वहम् ŚivāL.35; NāmMā.189; यः स्मरेत्सततं भक्त्या नारायणमतन्द्रितः। अन्वहं तस्य वासाय श्वेतद्वीपः प्रकल्पितः BrahmP. 61.50; मनसि स्वरसेन ... प्रचरत्यन्वहमस्य गोचरेषु। प्रसृतोऽपि ... युष्मत्परिचर्याचतुरः सदा भवेयम् Stotrā. 12.25; जलधिः ...। क्षुभ्यत्पंक्ककलंककल्मषतनुः क्ष[ा][र]स्वभावस्तुलान्नाप्नोद्व[ा]सुरमूर्तिनाखिलजगत्सेव्येन येनान्वहं नित्यालंकृतसत्प[थो] (Read सत्पथो) ... श्रीपृथ्वीश्वरभूपतिर्विजयते EI.iv.46.131; प्रपञ्चयति ... कुर्वाणानाम् ... रंहसम्। इह सह सुरैरायान्तीनां नरेश नगेऽन्वहं सुरतरुचये कुर्वाणानां वलक्षमरं हसम् Vāgbhaṭā. 4.28; वंशः कोऽपि ततो बभूव ... यस्माद्भूमिभृतोऽपि वीतगणिताः प्रादुर्भवंत्यन्वहं EI. i.296.4; iv.236.74; अर्धाङ्गे गिरिजां बिभर्ति गिरिशो विष्णुर्वहत्यन्वहं शस्त्रश्रेणिम् MohaRāPa.5.56; मदमत्सरमन्मथेषु मन्दं हृदयं योगिवदन्वहं वहन्तः। मरुतः ... अभिलषन्ति बन्धमोक्षम् Surath. 8.41; यतित्वे कष्टमन्वहम् PārśvC. 8.37; सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् SarvaDaSaṁ. 1.6;आतन्वतान्वहमनेकतुलाधिरोहं रंगेन्द्रधाम्नि नरदेवदिवाकरेण [र्] [हे]म्नामसंशयमभंक्ष्यत मेरुरर्थे EI. iii.14.20; iii. 123.80; ii.412.7; भास्वान् जितो यन्महसा ददाति झम्पां किमद्यापि न वारिराशौ। उन्मज्जति व्याकुलितोऽन्वहं च सुदुस्त्यजं हा हतजीवितव्यम् HammīMaKā. 1.31; कामाक्षि ... भवत्कटाक्षः। वैमल्यमन्वहम् ... भक्तहृदयाय ... ददाति MūkaPañ. 1.42; 5.90; अव्यात् ...। भवतां भवतां नागः शांकरिः शंकरोन्वहम् EI. iv.321.2; दातुं भक्ताय कल्याणं गर्भं बिभ्रदिवान्वहम्। तुन्दिभो गणराजः स विघ्नशान्तिं करोतु नः RājTa.(Jo.)2; गेहं महैर्मदस्सन्महमंदशाहुरयते सार्थाभिधामन्वहम् EI.xii.174.78; iv.274.71; सहायास्त्वत्करे वयम्। वर्तामहे ... अन्वहम् ParamāKā. 24.38; 80.13.

**अन्वहलभ्य** (anvaha-labhya) *adj.* which is to be attained everyday प्रसीदान्वहलभ्येऽर्थे तवात्र कियती क्षतिः KathāSaSāg. x. 8.140.

**अन्वा** (anvā) *f.* one that blows on or after अन्वासि रात्र्यै त्वा रात्रिञ्जिन्व PañcBr.i.9.8, cf.**अनुवा**.

**अन्वाकर्षक** (anv-ākarṣaka) *adj.* which draws or drags near from the preceding one, pw.

**अन्वाकाङ्क्ष्** (anv-ākāṅkṣ-) I.U. to wait till, to expect अतिथिम्। गोदोहनमात्रं। कालमन्वाकाङ्क्षेत् ŚaṅkhaLiDS. 133.

**अन्वाकृ** (anv-ākṛ-) VIII.P. **1** to imitate तत्पशूनन्वाकुर्वन् KāṭhS. 24.7 (ii.98.4); KapiKaS. 37.8(203.6); तस्मै जरदश्वं निरमणमन्वाकरोतिVādhūŚS. iii.75.2; **2** to collect as सूर्यां सावित्रीं तस्यै सर्वे देवा वरा आगच्छंस्तस्या एतत्सहस्रं वहतुमन्वाकरोत् AitBr.17.1 (452); JaimiBr.1.213; सविता सूर्यां प्रायच्छत्सोमाय ... तत् सहस्रमन्वाकरोद् दुहित्र उह्यमानाया एतदासां देवतानामासीत् KauṣīBr.18.1(78.22); [to give to any one to take with him, MW.]

**अन्वाकृति** (anv-ākṛti) *f.* similar shape, image or figure लोकतो नक्षत्राण्यन्वाकृतयश्च ŚāṅkhāGS.iv.19.5.

**अन्वाकृष्** (anv-ākṛṣ-) I.P. **A** (pass.) to be drawn, to be related after, i.e. to be construed with असन्नेवेति श्लोकस्य ब्रह्मपुच्छमित्युक्तब्रह्मविषयत्वात्। न ह्यत्रानन्दमयोऽन्वाकृष्यते NyāySu.(Ja.)141A.13 (*on* i.1.6); **B** (*caus.*) to cause to relate, i.e. to drag after अतदालम्बनप्रतीतये प्रमाणमागमः। प्रमाणान्तरवृत्तिस्तु प्रत्यक्षमन्वाकर्षयतीति न पुरुषातिशयो निवार्यः स्यात् PramāVāSvopVṛ.112.4.

**अन्वाक्रम्** (anv-ākram-) I.P. **A** to follow रु॒द्रमन्त॒रा॑यन्स आ॑दि॒त्यान॒न्वाक्र॑मत TaiS. VI.v.6.3; **B** to visit in succession सः ... गजाह्वयात्तीर्थपदः पदानि। अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः BhāgP.iii.1.17.

**अन्वाक्शायम्** (anvākśāyam) *adv.* by reciting successively ए॒तैरे॒वं जु॑हुयात्सम॒तयज्ञैं च॒तुर्भि॑श्च॒तुर्भि॒रन्वाक्शा॑यं पु॒रस्ता॑त्प्रात॒रनुवाक्य॑स्य MaiS.i.9.8 (i.139.11)

**अन्वाक्षि** (anv-ākṣi-) II.P. to dwell upon यत्ते॒ अन्नं॑ भुवस्पत आक्षि॒यति॑ पृथि॒वीमनु॑ AV. x.5.45; AV. (P.) xvi.132.7.

**अन्वाक्षित** (anv-ākṣita) *adj.* dwelt upon यत्ते अन्नं भुवस्पत आक्षितं पृथिवीमनु AV. (P.) i.63.1.

**अन्वाख्या** (anv-ākhyā-) II.P. **1A** (pass.) to be stated **B** (pass.) to be described **C** (pass.) to be explained or analysed grammatically **2A** to use or employ **B** to reuse or reemploy **3** to narrate **4** to reconsider **5** to refer, to enumerate **1A** (pass.) to be stated किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते MahāBh.i.5.5 (*on* i.1.0); किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते MahāBh. i.15.9 (*on* ŚivSū.(Gr.)1); **1B** (pass.) to be described पदार्थाः ...। यथा तु भवन्ति तथाभूता एवार्था अन्वाख्यायन्ते NyāyVār.21.16 (*on* i.1.1); अविपरीतोऽयमागमो गुरुपरंपरयान्वाख्यायते JayaMa. 3.16 (*on* 1.1); **1C** (pass.) to be explained or analysed grammatically यदि युगपत्समासतद्धितावन्वाख्यायेते ततो नैकत्रापि सामर्थ्यं लभ्यते TantrVā. 396.21 (*on* ii.1.16); मयूरशब्दः ... पतत्रिव्यक्तिषु वर्तमानो मह्यां रौतीत्यन्वाख्यायते TātpaṬ. (Vā.) 101.22 (*on* i.1.3); **1D** to convey, cf. **अन्वाख्यापक2**; **2A** to use or employ, cf. **अन्वाख्यात1**; **2B** to reuse or reemploy, cf. **अन्वाख्यान 7**; **3** to narrate, cf. **अन्वाख्यान 2**; **4** to reconsider, cf. **अन्वाख्यान 6**; **5** to refer or enumerate, cf. **अन्वाख्याय1.**

**अन्वाख्यात** (anv-ākhyāta) *adj.* **1** which is used or employed संस्कृतं नाम देवी वागन्वाख्याता महर्षिभिः Kāvyāda.1.33; **2A** which is stated औदुम्बरीवेष्टनवाससोऽपि प्रकाशश्रुतिमूलत्वमेवान्वाख्यातम् TantrVā.106.24 (*on* i.3.4); अन्वाख्यातेऽपि प्रयोजने न प्रवर्तेरन् SarvaDaSaṁ.13.55; **2B** which is explained or analysed grammatically ऋफिडऋफिड्डइत्येतौ तु अनन्वाख्यातौ Pradī.i.103A.5 (*on* ŚivSū.(Gr.)2)

**अन्वाख्यातत्व** (anvākhyāta-tva) *n.* the state of being explained or analysed grammatically ऋतकशब्दोऽन्वाख्याततत्वाद् भवतु लृतकशब्दस्य निवर्तकः Pradī.1.103A.4 (*on* ŚivSū.(Gr.)2)

**अन्वाख्यातविधि** (anvākhyāta-vidhi) *m.* injunction of using that (word) which is explained or analysed grammatically अन्वाख्यानान्वाख्येयान्वाख्यातविधिप्रयोगानन्वाख्यातप्रतिषेधवर्जनषट्कस्याप्यवगम्यमानवेदविधिमूलत्वादनादित्वे सति सर्वेषाम् ... न किंचिदनुपपन्नम् TantrVā. 228.18 (*on* i.3.25)

**अन्वाख्यातव्य** (anv-ākhyātavya) *adj.* to be explained or analysed grammatically जातिशब्दश्चायं वृद्धव्यवहारेऽवस्थितो यत्र प्रसिद्धस्तत्रान्वाख्यातव्यः TantrVā. 210.15 (*on* i.3.18); उपधालोपस्य स्थानिवत्त्वाभावात् घस्य जश्त्वम्। समाना ग्धिः। सग्धिः। इत्यादिप्रयोगमनुसृत्यान्वाख्यातम् PrakriKau.ii.715.10.

**अन्वाख्यातसाधुत्व** (anvākhyāta-sādhutva) *adj.* grammatical correctness of which is spoken of or mentioned अन्यथा कृत्वा चोदितम् ... इति। अन्यथैवं कथमित्यन्वाख्यातसाधुत्वोऽपि णमुल् न प्रयुक्तः TantrVā. 201.20 (*on* i.3.18)

**अन्वाख्यातुम्** (anv-ākhyātum) *inf.* to explain grammatically भिन्नप्रसिद्धयोस्तेन दधिदध्येति शब्दयोः। आचक्षाणेन साधुत्वं दधीत्यौत्सर्गिकः कृतः। अन्वाख्यातुं स्वरूपेण दध्यशब्दं च वेदितुम्। स्वशास्त्रे लघुबोधार्थमेकत्वमिव दर्शितम् ŚlokaVār.6.205 (782.6)

**अन्वाख्यातृ** (anv-ākhyātṛ) *adj.* who gives grammatical explanation or analysis कियत्यपि चांशे प्रायेण सर्वेषामन्वाख्यातॄणामविवादः NyāyMañ.i.354.23.

**अन्वाख्यान** (anv-ākhyāna) *n.* **1** subsequent chapter **2** narration, tale **3A** statement or account **B** subsequent explanation referring to what is mentioned before **4** grammatical explanation or analysis **5** description **6** reconsideration **7** reuse or reemployment (for other purpose) **1** subsequent chapter य॒दु भि॒न्नायै प्रा॒यश्चित्ति॒रुत्त॒रस्मिं॒स्तद॒न्वाख्या॒ने ŚatBr.VI.v.2.22; VI.vi.4.7; तद्वा एतदेव श्रीर्नामान्वाख्यानम् VādhūŚS.iv.92.9; तद्वा एतज्ज्लाध्यासो नामान्वाख्यानम् VādhūŚS.iv.98.20; **2** narration, tale त॒स्मादाहु॒र्नैतद॒स्ति य॒द्देवासुरं य॒दि॒दम॒न्वाख्या॒ने त्वदु॒द्यत इतिहा॒से त्वत् ŚatBr. XI.i.6.9 [*but* MW. an explanation keeping close to the text] **3A** statement or account उभयमनेन क्रियतेऽन्वाख्यानं च संज्ञा च MahāBh.i.209.1 (*on* i.2.32); i.209.4 (*on* i.2.32); स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते MahāBh. i.363.12 (*on* ii.1.1); एवं तर्ह्यन्वाचष्टे पौत्रप्रभृतीति वर्तते इति। किमेतस्यान्वाख्याने प्रयोजनम् MahāBh.ii.265.13 (*on* iv.1.163); किं ब्रवीषि? शान्तं पापम् ... स्वागतमन्वाख्यानाय PādaTā. 32.5; न वृद्धतरस्योभयवेदिनो मूलशब्दानुसारिणी पदार्थप्रतिपत्तिरिदानींतनानां त्वपभ्रंशादेव अत एव अन्वाख्यानमपि प्रयोजनवत् TātpaṬ.(Vā.)714.22 (*on* v.2.11); **3B** subsequent explanation referring to what is mentioned before अथातः पूर्णाहुतिरेवान्वाख्यानमभिसंपद्यते VādhūŚS. iii.12.1; तस्य नु हैतदेवं भवति यथैतदन्वाख्यानेन VādhūŚS. iii.36.3; तस्मादन्वाख्यानान्यसृजत VādhūŚS. iv.29.18; iv.90.32; तत्त्वमस्यादिवाक्यैर्यथावस्थितवस्तुयाथात्म्यान्वाख्याननिष्ठैर्न यथोक्तोऽर्थः प्रतिपत्तुं शक्यते अभिधाश्रुतित्वात्तेषाम् NaiṣkaSi. 134.5; आगमस्यानुमानजत्वादनुमितस्य चागमेनान्वाख्यानादागमात्प्रागनुमानं लक्षयति TattvVai. 12.19 (*on* 1.7); प्रयुक्तानामेव लक्षणेनान्वाख्यानादिति प्रयुक्तानामिदमन्वाख्यानमित्यन्यत्र भाष्योक्तेः LaŚabdeŚe. i.320.28; अतिप्रसङ्गपरिहार-